16-12-2020

संस्कृतसामान्यम् । उपशास्त्री II

अनिवार्यपत्रम् । रूपसिद्धिः ।

प्राप्तोदकः → लौ०वि० - प्राप्तम् उदकं यम् । अलौकिकवि० - प्राप्त सु उदक सु । अत्र द्वितीयाविभक्त्यर्थे यम् पदेन प्रथमान्तपदं प्राप्तः तथा च उदकः पदस्य 'अनेकमन्यपदार्थे' सूत्रसहकारेण बहुव्रीहिः समासः । कृत्तद्धितसमासाश्च सूत्रेण प्रातिपदिक संज्ञा । सुपोधातुप्रातिपदिकयोः सूत्रेण सुप् इत्यस्य लोपः । प्राप्त उदक । आद्गुणः सूत्रेण अ, उ स्थाने गुणम् भूत्वा - प्राप्तोदक । एकदेशविकृतमनन्यवत् न्यायेन पुनः प्रातिपदिक संज्ञा । स्वौजसमौट्० सूत्रेण सु प्रत्ययः - प्राप्तोदक सु । ससजुषो रुः सूत्रेण सकारस्य रकारः - प्राप्तोदक र् । खरवसानयोः विसर्जनीयस्य सूत्रेण रकारस्य विसर्गः - प्राप्तोदकः रूपं निष्पन्नम् ।

पीताम्बरः → लौ०वि० - पीतानि अम्बराणि यस्य सः । अ०वि० - पीत जस् अम्बर जस् । अत्र षष्ठीविभक्त्यर्थे प्रथमान्तपदयोः पीतस्य अम्बरस्य च बहुव्रीहिः समासः । शिष्टं पूर्ववत् । पीताम्बरः ।

अपुत्रः → लौ०वि० - अविद्यमानः पुत्रो यस्य सः । अ०वि० - न विद्यमान सु पुत्र सु । 'नञोऽस्त्यर्थानां०' वार्तिकेन नञ् (न) परे विद्यमान पदस्य पुत्र पदेन सह बहुव्रीहिः समासः । प्रातिपदिक संज्ञा, सुप्लोपः - न विद्यमान पुत्र । पुनः 'नञोऽस्त्यर्थानां०' वार्तिकबलेन न परे विद्यमान इत्यस्य लोपः - न पुत्र । 'नलोपो नञः' सूत्रेण न् इत्यस्य लोपः → ~~न्~~ अ पुत्र । शेषं पूर्ववत् → अपुत्रः ।

16-12-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्य)
राधा-उमाकान्त सं०महावि० सुखसेना, पूर्णियाँ

16-12-2020

संस्कृतसामान्यम् । उपशास्त्री-I

अनिवार्यपत्रम् । तत्पुरुषः समासः । रूपसिद्धिः ।

शङ्कुलाखण्डः ।

'तृतीया तत्कृतार्थेन गुणवचनेन' इति सूत्रेण तृतीयान्तपदस्य शङ्कुलायाः प्रथमान्तपदेन खण्डेन सह तत्पुरुषः समासः ।

लौकिक विग्रहः - शङ्कुलया खण्डः ।

अलौकिक विग्रहः - शङ्कुला टा खण्ड सु ।

कृत्तद्धित समासाश्च सूत्रेण प्रातिपदिक संज्ञा ।

सुपो धातु प्रातिपदिकयोः सूत्रेण सुप् इत्यस्य लोपः → शङ्कुला खण्ड

प्रथमानिर्दिष्टं समास उपसर्जनम् सूत्रेण शङ्कुला पदस्य (शब्दस्य) उपसर्जन संज्ञा । उपसर्जनं पूर्वम् सूत्रेण शङ्कुला इत्यस्य पूर्वप्रयोगः । शङ्कुला खण्ड । इत्यस्मिन् अवस्थायां स्वौजसमौट्० इति सूत्रेण सु विभक्तिः → शङ्कुला खण्ड सु ।

उपदेशेऽजनुनासिक इत् सूत्रेण सु इत्यस्य उकारस्य इत् संज्ञा, तस्य लोपः → शङ्कुलाखण्ड स् । ससजुषो रुः सूत्रेण सकारस्य रु आदेशः → शङ्कुलाखण्ड रु । पुनश्च रकारोत्तरवर्ती उकारस्य इत्संज्ञा, लोपः → शङ्कुलाखण्ड र् । इत्यस्मिन् अवस्थायां खरवसानयोः० सूत्रेण रकारस्य विसर्गः → शङ्कुलाखण्डः रूपं निष्पन्नं भवति ।

16-12-2020

डॉ० निर्मलकुमार झा, (स० प्राचार्य)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

16-12-2020

शास्त्री

साहित्यम् ।

छन्दालङ्कारनिर्णयः →

"स्थिताः क्षणं पक्ष्मसु ताडिताधराः
पयोधरोत्सेधनिपातचूर्णिताः ।
वलीषु तस्याः स्खलिताः प्रपेदिरे
क्रमेण नाभिं प्रथमोदबिन्दवः ॥"

अस्य पद्यस्य प्रत्येके चरणे द्वादशाक्षराः, सन्त्येवात्र जगतीजात्या छन्दः अस्ति । पद्ये यगणादि निर्णयः →

स्थिताः क्षणं पक्ष्मसु ताडिताधराः, पयोधरोत्सेधनिपातचूर्णिताः ।

| । ऽ । | ऽ ऽ । | । ऽ । | ऽ । ऽ | । ऽ । | ऽ ऽ । | । ऽ । | ऽ । ऽ |
|---|---|---|---|---|---|---|---|
| जगण | तगण | जगण | रगण | जगण | तगण | जगण | रगण |

जगणादिनिर्णयोपरान्ते ज्ञातो मयात्र वंशस्थ छन्दः ।
वंशस्थवृत्तस्य लक्षणमस्ति →

"जतौ तु वंशस्थमुदीरितं जरौ ।"

अलंकारनिर्णयः → पर्यायालङ्कारः ।

"क्वचिदेकमनेकस्मिन्ननेकं चैकगं क्रमात् ।
भवति क्रियते वा चेत्तदा पर्याय इष्यते ॥"

16-12-2020

डॉ॰ निर्मलकुमार झा, ( स॰ प्राचार्यः )
रा॰ उ॰ सं॰ महावि॰ सुखसेना, पूर्णियाँ